अहस्समवृत्तयोरन्तरं ज्याह्वयं दक्षिणोत्तरं बाहुतुल्यं स्यात्। यथा विषुवद्वृत्तादुत्तरतो दक्षिणतो वा क्रान्तिज्यान्तरे द्युज्यावृत्तं तथा समवृत्तादपि बाहुवशादुत्तरतो दक्षिणतो वा बाहुतुल्येऽन्तरे उपवृत्तं कल्प्यम्। तदपि भांशैरङ्क्यम्। बाहुवर्गोनत्रिज्यावर्गस्य पदं तस्मिन् वृत्ते द्युज्यावद्व्यासार्धम्। अथ द्युज्यावृत्तोपवृत्तयोर्यौ प्राक्पश्चात्संपातौ तयोर्जीवावद् बद्ध सूत्रं निबध्यते तस्यार्धमुपवृत्ते नतांशानां ज्या। सैवाहोरात्रवृत्तनतांशानां भुजज्या। अथ तदानयनम्। नतासूनां या भुजजीवा सा द्युज्यावृत्ते परिणास्यते। यदि त्रिज्यावृत्ते एतावती तदा द्युज्यावृत्ते कियतीति। एवमुपवृत्तनतांशज्या भवति। ततो यद्युपवृत्तव्यासार्धे एतावती तदाक्षज्याव्यासार्धे कियतीति। ततो द्युज्याग्रे एतावती वलनज्या तदा त्रिज्याग्रे कियतीति। अत्र प्रथमेऽनुपाते त्रिज्या हरो द्युज्या गुणः। तृतीयेऽनुपाते त्रिज्या गुणो द्युज्या हरोऽतस्तुल्यत्वात् तयोर्नाशे कृते नतासूनां भुजज्याक्षजीवया गुणितोपवृत्तव्यासार्धेन भक्ता सा सूक्ष्मा वलनज्या स्यात्। अत उक्तमग्रान्ततलयोर्योग इत्यादि। अथ दृष्टान्तः। यत्र किल वृषभान्तक्रान्तितुल्योऽक्षः २०। १८ तत्र वृषभान्तस्थोऽर्को दिनार्धे खस्वस्तिके भवति। तदा क्रान्तिवृत्तं दृङ्मण्डलाकारं स्यात्। सत्रिंशद्धोऽर्को राशिपञ्चकं सिद्धान्तः। स च तदा क्षितिजे वर्त्तते। तत् प्राक्परयोरन्तरं क्षितिज प्रत्यक्षं वलनं दृश्यते। सा च सिद्धान्तस्याप्या। तत् कथं सत्रिंशद्धार्कोत्क्रमक्रान्तिर्वलनम्। अतोऽसत्। अक्षादानयनं विना नेदमपाहृयं वलनमुत्पद्यत इत्यर्थः। अथान्यो महान् दृष्टान्तः। यत्र देशे षट्षष्टिभागाः ६६ अक्षः। तत्र मेषादौ क्षितिजस्थे सर्वेऽपि राशयः समकालमेव क्षितिजस्था भवन्ति। तदा क्रान्तिवृत्तमेव क्षितिजं भवतीत्यर्थः। तत्र मेषादौ वृषभादौ मिथुनादौ वा स्थिते रवौ परमं त्रिज्यातुल्यमेव स्फुटं वलनं स्यात्। यतः क्रान्तिवृत्तप्राचुत्तरा जाता। तथा विक्षेपाभावे सति तदा रवेर्दक्षिणस्यां दिशि स्पर्शः। चन्द्रस्योत्तरस्यामित्यर्थः। एतदुक्तं भवति। तत्र देशे तस्मिन् काले तस्य त्रिज्यातुल्यस्य वलनस्यान्यथानुपपत्त्याक्षदीयमेव वलनानयनं समीचीनम्। तत्र देशेऽक्षज्या ३१४०। मेषादिगे रवौ द्युज्या ३४३८। चरज्यासवः ०। क्षितिजस्थेऽर्के नतघटिकाः १५। आयनवलनचापांशाः २४। आक्षवलनचापांशाः ६६। स्फुटवलनस्य चापांशाः ९०। वृषादिगे रवौ द्युज्या ३२६६। चरज्यासवः १६७०। नतघटिकाः १९। २८। आयनवलनचापांशाः २१। ४। अक्षजस्य ६८। ५६। स्फुटवलनस्य चापांशाः ९०। मिथुनादिगे द्युज्या ३२१८। चरासवः ३४६५। नतघटिकाः २४। २७। आयनवलनांशाः २१। २२। अक्षजस्य ७७। २८। स्फुटस्य ९०। एवं सर्वत्र।”

**वलभि**(भी) स्त्री वल्यते आच्छाद्यते वल–अभि वा ङीप्। वडभीशब्दार्थे गोपानस्याम् अमरटी०।

**वलय** पुंन० वल-अयन्। १हस्तपादकटकादौ अमरः। उत्तरपदस्थः तदाकारवेष्टने यथा भूवलयम्। २वेष्टनभूमौ ४गोले च। ५गलरोगभेदे भावप्र० “बलास एवायतमुन्नतञ्च शोथं करोत्यन्नगतिं निवार्य। तं सर्वथैवाप्रतिकार्य्यवीर्य्यं विवर्जनीयं वलयं वदन्ति”। ६वेलायां ७कङ्कणे जटा०। [अमरः।

**वलयित** त्रि० वलयमिव आचरितम् वलय+क्विप्–क्त। वेष्टिते

**वला** स्त्री वल–अच्। (वेड़ाला) ओषधिभेदे रायमुकुटः। २बलाशब्दार्थे च। [अजा० टाप्।

**वलाक** पुंस्त्री० वल–आकन्। वकपक्षिणि अमरः स्त्रियां

**वलाहक** पु०वारि वहति पृषो०। १मेघे २मुस्तके च अमरः। ३पर्वते दैत्यभेदे ५नागभेदे मेदि० श्रीकृष्णस्य हयभेदे “स्यन्दनस्तु सदानन्दः सारथिस्तस्य दारुकः। तुरङ्गाः शैब्यसुग्रीवमेघपुष्पबलाहकाः” त्रिका०।

**वलि** पु० वल–इन्। उपहारद्रव्ये ओष्ट्रादित्वमित्यन्ये।

**वलिर्** त्रि० वल–घञर्थे क वलसंवरणमस्त्यस्य इरन्। केकरे अमरः।

**वलिश** न० वलिना उपहारद्रव्येण श्यति मत्स्यान् शो–क। वड़िशशब्दार्थे। [पटले जटा०।

**वलीक** न० वल्यते संव्रियतेऽनेन ईकन्। वनीकशब्दार्थे

**वलूक** न० वल–बा ऊक। १अम्बुरे २पक्षिभेदे सि०कौ०।

**वल्क** भाषणे चु०उभ०द्वि०वेट्। वल्कयति ते अववल्कत् त।

**वल्क** न० वल–संवरणे क कस्य नेत्त्वम्। १वृक्षादीनां त्वचि वल्कले २मत्स्यानां त्वचि शल्के (आँइस) मेदि०।३खण्डे च विश्वः। ४पट्टिकालोध्रे पु० राजनि०।

**वल्कतरु** पु० वल्कप्रधान तरुः शा०त०। गुवाकवृक्षे राजनि०।

**वल्कद्रुम** पु० वल्कप्रधानो द्रुमः। भूर्जपत्रवृक्षे राजनि०।